Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 1 | ISSN : 2582-0095

# श्रीगीतसीतावल्लभे शृङ्गारयोजना



विक्रान्तसाहु:
शोधच्छात्र: साहित्यविभाग:,
राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

**शोधसार:** – श्रीगीतगोविन्दमाधारीकृत्य रचितं प्रत्येकमपि गीतिकाव्यं मधुरकोमलकान्तपदावली-युक्तमवश्यमेव भवति। अत्र सहृदयानां रसास्वाद: अक्लेशेन जायते । तत्रापि प्रायश: सर्वेषु एतादृशेषु गीतिकाव्येषु शृङ्गाररसस्य प्राधान्यमेव दृश्यते । सर्वेषु रसेषु शृङ्गार: रसराज: इति कथ्यते । यदा कवि: शृङ्गारी भवति तदा तस्य काव्यं जगद्रसमयं करोति । यदि सैव कवि: अशृङ्गारो भवति, तर्हि सर्वं निरसं प्रतीयते । ध्वन्यालोककारेण तदेवोच्यते –

**शृङ्गारी चेत्कवि: काव्यं जातं रसमयं जगत् ।**
**स एव चेदशृङ्गार: नीरसं सर्वमेव तत् ।।**

एवं गीतिकाव्यरचनापरम्परायां श्रीजयदेव: शृङ्गारी कविरिति नाम्ना प्रसिद्ध:। तस्य काव्यञ्च शृङ्गाररसप्रधानमेव, यत्र विप्रलम्भसम्भोगयो: द्वयोरपि शृङ्गारभेदयो: आस्वाद: आसमाप्तिं यावत् सहृदयै: कर्तुं शक्यते । आरम्भे राधाकृष्णयो: विप्रलम्भ: अन्ते च तयो: सम्भोग: अत्युत्कृष्टतया श्रीजयदेवेन उपस्थापित:। अनेन काव्येन अनुप्राणित: कवि: श्रीशितिकण्ठो नाम श्रीरामचरित्रमाधारीकृत्य 'गीतसीतावल्लभम्" इत्याख्यं काव्यं रचयामास, यत्खलु सहृदयसमाजे रामसेवकसमाजे च अतीव प्रियतमं प्रतिभाति । अस्मिन्नेव काव्ये शृङ्गाररसस्य पर्यालोचनम् अस्य शोधप्रबन्धस्य प्रमुखं लक्ष्यं भवति। अत्र विशिष्टतया पञ्चवट्यां पर्णशालायां सीतारामयो: शृङ्गारोद्दीपकवर्णना, सूर्पणखामाध्यमेन रामरतिसन्दर्भे वर्णना, मुग्धा नायिका सीता, कैकेयीमानावसरे दशरथस्य प्रणयवचनम् इत्येते विषया: प्राधान्येन आलोचितास्सन्ति। प्रसङ्गात् कवे: शितिकण्ठस्य तत्कृते: गीतसीतावल्लभस्य च परिचयोऽपि संक्षेपेणात्र उपस्थापित:।

**मुख्यशब्द:** – पञ्चवटीपर्णशाला, सूर्पणखाप्रणयवचनम्, रामरति, मुग्धा सीता, कैकेयीमानम्, दशरथप्रणयवचनम्।

**Article Info**
Volume 4 Issue 1
Page Number: 52-57

**Publication Issue :**
January-February-2021

**Article History**
Accepted : 02 Feb 2021
Published :15 Feb 2021

श्रीगीतगोविन्दशैलीमाधारीकृत्य रचितेषु रामायणाश्रितरागकाव्येषु कविशितिकण्ठेन विरचितं गीतसीतावल्लभमपि एकम्। अस्य काव्यस्य कर्ता कवि: शितिकण्ठ इति प्रसिद्धनामा कवि: उत्कलस्य गञ्जममण्डलान्तर्गत-शरदुर्गराजधान्यां हरिकृष्णपुराग्रहारे अजायत। अत्र प्रतिपदित: गञ्जाममण्डलस्य शरदुर्ग: इदानी शोरगड इति नाम्ना प्रथित:। शितिकण्ठस्य उपनाम त्रिपाठी आसीत् । स: सामवेदी ब्रह्मण:। अयं महादेवस्य पुत्र:। अस्य तिस्त्र: भगिन्य आसन्। यथा – लक्ष्मी:, चञ्चला,

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

श्रद्धा चेति । कवेरस्य द्वौ पुत्रौ कन्याश्चासन्। पुत्रयोर्नाम श्रीहर्षः, प्रफुल्लश्च । कन्याः क्रमशः सरस्वती, उमा, सुरेखा, अप्सरा, असूया, अपर्णा, हारामणिश्च। कवेरस्य एकैव कृतिः गीतासीतावल्लभमेव भवति। राज्ञः जनार्दनस्यानुरोधक्रमेण काव्यमिदं कविना प्रणीतमिति स्वयं ग्रन्थान्तिमश्रलोके उल्लिखति । काव्येऽस्मिन् द्वादशमर्गाः विद्यन्ते । क्रमशः सर्गाणां नामानि यथा – (1) विश्वमित्रसमागमः (2) अनङ्गाश्रमनिवासः (3) ताडकादिवधः (4) धनुर्भङ्गः (5) सीतावरिणयः (6) अयोध्याप्रवेशः (7) वनोपगमनम् (8) भरतसमागमः (9) गौतमीतीरनिवासः (10) मायामृगसमागमः (11) सीतान्वेषणम् (12) श्रीरामाभिषेकश्च । एवं सम्पूर्णेऽस्मिन् काव्ये चतुर्विंशतिः (24) प्रबन्धगीतानि, षद्सप्ततिः (76) श्लोकाश्च विलसन्ति। अत्र अर्णाट-गुर्जरी-गुण्डकिरी-देशवराडी-देशाख्य-भैरव-मङ्गलगुर्जरी-मालव-मालवगौड-रामकेरी-वराडी-वसन्त-विभाषाख्याः त्रयोदश रागाः प्रयुक्तास्मन्ति । अनुष्टुप्-आर्या-उपेन्द्रवज्राा-न्दुतविलम्बित-पुष्पिताग्रा-पृथ्वी-वंशस्थविल-वसन्ततिलका-मालिनी-शर्दुलविक्रीडित-शिखरिणी-स्त्रग्न्धरा-हरिण्याख्यानि त्रयोदश (13) छन्दसि व्यवहृतानि । एवं विविधरागतालच्छन्दोभिः विमण्डितं गेयकाव्यमिदं सर्वदा सर्वथा च प्रशंसनीयं सहृदयहृदयसंवेद्यश्च भवति । यथा जयदेव ग्रन्थारम्भे वदति – सरसकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम् इति, तथैव शितिकण्ठोऽपि ग्रन्थादौ लिखति –

**यदि मतिर्निरताघसमुद्धतौ यदि रतिर्दुरितौघनिराकृतौ ।**
**लसदलङ्कृतिमञ्जुपदध्वनिं शृणु तदा शितिकण्ठसरस्वतीम् ।। (1/3) इति ।**

शृङ्गं नाम कामुकुयगलयोरुत्पीडकम् ऋच्छतीति शृङ्गारः। अनेन कामोद्भवेन यः सम्भूयते सः शृङ्गार इत्युच्यते। उत्तमप्रकृतिकः नायकः अस्य रसस्यालम्बनविभाव भवति। अनुरागशून्याः परकीयाः वेश्यानायिकाः अस्य आलम्बनानि न भवन्ति। तद्भिन्नाः नायिकास्तथा च दक्षिणनायका अस्योपयुक्तालम्बनानि ; चन्द्र-चन्द्रिका-चन्दनानुलेपन-भ्रमरझङ्कार-वसन्तकाल-रमणीयोपवन-शून्यवासगृह-मयूरचन्द्रिकादय उद्दीपनविभावा ; भ्रुविक्षेप-कटाक्षादयोऽनुभावाः ; औग्र्-मरण-आलस्य-जुगुप्सादिव्याभिचारिभावान् विहाय अन्ये चास्य रसस्य पोषका कथ्यन्ते। अस्य रसस्य स्थायिभावः रतिः । वर्णः श्यामो देवता च विष्णुः । साहित्यदर्पणे उच्यते –

**शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।**
**उत्तमप्रकृतिप्रायो रसः शृङ्गार ईष्यते ।।**
**परोढां वर्जयित्वा तु वेश्यां चाननुरागिणीम् ।**
**आलम्बनं नायिकाः स्युर्दक्षीणाद्याश्च नायकाः ।।**
**चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम् ।**
**भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः ।।**
**त्यक्त्वौग्यमरणालस्यजुगुप्साव्यभिचारिणः ।**
**स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः ।।**
**विप्रलम्भो सम्भोग इत्येष द्विविधो मतः ।**[1]

पूर्वमेव शृङ्गारस्य लक्षणमालोचितम्। रतिरस्य स्थायी भावो भवति। अत्र योजिताः विभावाः, अनुभावाः, व्यभिचारभावश्च हृदये कन्दर्पज्वालां जनयन्ति। स्त्रीपुरुषयोः प्रणयसूचनया सहृदययोर्मनसि वासनारूपेण विद्यमाना रतिः

दध्यादिन्यायेन रसरूपेण परिणता सती सहृदयैरास्वाद्यते। अस्योदाहरणं श्रीगीतसीतावल्लभे पञ्चमे सर्गे श्रीरामचन्द्रेण शिवधनुर्भङ्गादनन्तरं सीतायाः कृते सख्या उक्तं वचनं भवति । यथा –

**मिलति रघुकुलहीरे सह मुनितिलकेन ।**

**कलितधनुषि रुचिरे मुदमिह विदधति के न ?**

**कथमधुनाप्यतिमुग्धा सखि ! सीदसि ? ।।**[2]

मिथिलानरेशः जनकः स्वपुत्र्याः सीतायाः विवाहसन्दर्भे पणं स्थापितवान् आसीत् यत् यः कोऽपि वीरपुरुषः शिवधनुर्भङ्गं करिष्यति स एव सीतया सह विवाहं करिष्यतीति । किन्तु दौर्भाग्यं सीताया आसीत् यत् तावता कोऽपि वीरपुरुषः न प्राप्तः। एतदर्थं सीतायाः मनसि दुःखम् अनुतापश्च प्रणयपूर्वसूत्ररूपेण वा बीजरूपेण विराजते स्म । यदा श्रीरामचन्द्रेण धनुर्भङ्गरूपं तत्कार्यं सम्पादितवान् तदा सीतायाः मनसि खेदः न भवेदिति मनसि निधाय सखीमुखेन कविः शितिकण्ठः गीतमिदं प्रस्तौति । रघुकुलहीरः श्रीरामचन्द्रः मिथिलां सम्प्राप्य रुचिरं धनुः कलितवान्। सीतायाः बहोःकालात् प्रतीक्षितस्य अभिलाषस्य पूरणं जातम् । एतत् कस्य मनसि मुदं न सन्तनोति ? सर्वेऽपि मुदं विदधति इत्यर्थः । अतः हे सखि ! भवती अतिमुग्धाऽपि दुःखमनुभवसति त्वम् ? अतः दुःखं त्यक्त्वा रामचन्द्रस्य वरणं कुरु इति गीतस्यायमर्थः।

अत्र आलम्बनविभावः सीता । रघुकुलतिलकस्य श्रीरामचन्द्रस्य प्राप्तिः उद्दीपनविभावः। धनुषः कलनम् अनुभावः। हर्षः व्यभिचारिभावः एतेषां सर्वेषां संयोगात् परकालिकसीतारामयोः विषये ज्ञातः रत्याख्यस्थायिभावः शृङ्गाररसरूपेण परिणतः सहृदयैरास्वाद्यते । अत्र सीता सख्या 'मुग्धा"नायिकारूपेण उल्लिखिताऽस्ति । अस्या लक्षणं साहित्यदर्पणे एवमुच्यते –

**प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ।**

**कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ।।**[3]

अर्थात् यस्याः कन्यायाः वयोवृद्ध्यनुगुणं यौवनं मदनविकारश्चेत्यनयोः अभिनवोन्मेषः जायते, या रतौ वामा, माने मृदुः, समधिकलज्जावती च भवति सा मुग्धा नायिका इति कथ्यते । अत्र रतौ वामा नाम सुरते प्रतिकूला इत्यर्थः । अस्मिन् सन्दर्भे साहित्यदर्पणस्य लक्ष्मीटीकामुच्यते –

**सकम्पा चुम्बते वक्त्रं हरत्येषोपगूहिता ।**

**परावृत्त्य चिरं तल्प आस्ते रन्तुञ्च वाञ्छति ।।**[4]

एवं सीतायाः कृते 'मुग्धा"शब्दस्योपन्यासः शृङ्गारस्यैव द्योतकोऽस्ति । कामस्य दशदशासु अभिलाषः, चिन्ता, स्मृतिः, गुणकीर्तनम्, उद्वेगः, प्रलापः, उन्मादः, व्याधिः, जडता, मरणम् इत्येते अन्तर्भवन्ति । एतासु दशासु सखीवचनेऽस्मिन् सीतायाः चिन्ता, अभिलाषश्च स्पष्टतया प्रतीयेते । अपि च सखी रामचन्द्रस्य गुणगानं करोति, यत्खलु सीता सावधाना शृणोति । अनेन गुणकीर्तनरूपा दशाऽपि आकलयितुं शक्यते । शृङ्गारे गुणकीर्तनं कदाचित् स्वयं नायकेन नायिकया वा क्रियते, कदाचित् प्रियतमायाः वा प्रियतमस्य गुणान् अपरेषां मुखात् श्रोतुं प्रबलोत्कण्ठा जायते । शितिकण्ठस्य प्रबन्धेऽस्मिन् श्रीरामचन्द्रस्य गुणान् सखीमुखात् सीता शृणोति । यथा – दशरथतनयेन गिरिशधनुः भग्नम्, आकाशात् देवगणाः पुष्पवृष्टिं

कुर्वन्ति, पिता जनक: प्रफुल्लवदनो विराजते, मुरजनिवहनाद: जायते इत्यादि । एतत् सर्वं वचनमनुतापवत्या: सीताया: हृदये रामचन्द्रं प्रति प्रणयातिरेकं विस्तारयितुं पार्यप्तमेव । अनेनैव सीताया: मनसि उद्वेग: प्रादुर्भविष्यति । अत: उत्तम: शृङ्गारप्रस्ताव: कविना शितिकण्ठेन अत्र कृत: । अपि च गीतस्य संग्रहश्लोकरूपेणापि सखी वदति –

**पूर्वं तादृशदारुण: पितृपण: क्षोणीधराकर्षण-**
**श्चिन्तां कुन्त इवाततान महतीं हन्तातिसन्तापद: ।**
**सोऽयं ते फलदो नवीनजलदो द्योतेन केनापि तद्-**
**भग्नं शैवधनुस्तदाधिरधुना सीते परित्यज्यताम् ।।[5]**

अत्र चिन्ता, आधि: इति पदयो: प्रयोग: कृत: कविना, यत्पदद्वयं कामदशान्तर्गतं भवति । सीताया: मनसि विद्यमाना चिन्ता कुन्त इव सन्तापकारिणी आसीत् । प्रथमयौवनदर्शना कामदग्धा सा आधिना (व्याधिना) पीडिताऽऽसीत्। परन्तु श्रीरामचन्द्रेण धनुषि खण्डिते सति ताम् आधिं त्यक्तुं सखी निवेदयति। अग्रे कामसन्तृप्ते: बीजवपनं च करोति । यथा[6] –

**त्यज सखि खेदं हृदि कलयेदं मम वचनं धृतहर्षम् ।**
**मृदुगतिकान्तं रचय नितान्तं सदसि सुधारसवर्षम् ।।**
**धीरमुदारं जगतीसारं वरय वरं रघुवीरम् ।**
**श्यामलकोमलकान्तिमनोहरमूर्त्तितिरस्कृतमारम् ।।1।।**
**कृतगुरुयत्नां धृतबहुरत्नां विलसितमौक्तिकजालाम् ।**
**सत्त्वतरङ्गां बलवदनङ्गां कलय गले मणिमालाम् ।। 2 ।।**
**कलितविभागं वपुषि सरागं स्वीकुरु कुङ्कुमरागम् ।**
**त्वत्पदि रक्ते सततमलक्ते बह सखि परमनुरागम् ।। 3 ।।**
**इयमपि काञ्ची रचयतु काञ्चिद्रुचिमिह समुचितदेशे ।**
**सपदि वयस्यां मण्डनशस्यां सन्दिश निजशयवेशे ।। 4 ।।**
**मणिभिररहितं हंसकसहितं रुचिनिचयै: परिपूर्णम् ।**
**विलसितहीरं नवमञ्जीरं पदकमले बह तूणम् ।। 5 ।।**
**कलय सलीलं वपुषि विनीलं विमलमिदं मृदुचेलम् ।**
**हाटककेतकमधुपकदम्बकमस्तविनिन्दितखेलम् ।। 6 ।।**
**रुचिजितकमले बह करकमले नवरुचिरवरणमालाम् ।**
**किशलयकलितामिव कुरु ललितां राममुदे सुविशालाम् ।। 7 ।।**

एवमेव दशमसर्गे यदा रामचन्द्रः भ्रत्रा पत्न्या च पञ्चवट्यां पर्णशालायं निर्माय निवासं कृतवान् आसीत् तदा सूर्पणखानाम्नी राक्षसी तत्रागत्य रामेण सह प्रणयं कर्तुं याचितवती । तत्र शितिकण्ठकविना सूर्पणखामुखेन अस्मिन् प्रणयप्रसङ्गे यत्किमपि उक्तं तत्सर्वं शृङ्गाररसद्योतकमेव भवति। कविः सूर्पणखां स्मरान्धनायिकारूपेण उपस्थापयति । यथा –

**अत्रान्तरे कृतनदीतटपर्णशालं**

**रामं वसन्तमिव मूर्त्तिधरं वसन्तम् ।**

**कान्तानुजप्रमुदितं मिलिता स्मरान्धा**

**कान्तारतस्सपदि सूर्पणखा जगाद ।।**[7]

अस्मिन् श्लोके नदीतटे पर्णशाला, वसन्तकालः, रामस्य वसन्तसदृशी मूर्त्तिः इत्येते विषयाः शृङ्गारोद्दीपकाः सन्ति। तत्र स्मरान्धा सूर्पणखा आलम्बनविभावः। तदीयस्मरान्धत्वं तथा च रामस्य समीपे गमनमनुभावः। एतेषां सर्वेषामपि संयोगात् रत्याख्यः स्थायी भावः शृङ्गाररूपेण परिणतः सहृदयैः आस्वाद्यते । अत्र सूर्पणखायाः वचनानि यथा –

**युवतिततिलोलमतिमीनहरणे स्वयं कुशलतरमलघुशोभम् ।**

**कुटिलनयनान्तवडिशं विलसितामिषं वहसि वत जनितगुरुलोभम् ।**

**अये ! कामकान्ते ! कथयाशु विपिनान्ते**

**वससि किमनाकुलं शमय हृदयानलं**

**कान्त ! भज भजनरसिकान्ते ।।**[8]

हृदयानलशमनं करोतु इति कथनेन विप्रलम्भपीडा आस्वाद्यते। एवमष्टपद्यामस्यां सूर्पणखायाः विरहवेदना कामौत्सुक्यञ्च विशिष्टतया वर्ण्यते । अतः विप्रलम्भस्य प्रकृष्टमुदाहरणमिदम् ।

यथा सीता कविना शितिकण्ठेन मुग्धानायिकारूपेण उल्लिखिताऽस्ति, तथैव अत्र सूर्पणखाऽपि मुग्धा इति पदेन प्रतिपादिता। यथा –

**मुग्धा वचो रघुपतेस्तदवेत्य सत्य-**

**मत्युत्सुकेत्य सविधं शुभलक्षणस्य ।**

**सा लक्ष्मणस्य कपटोक्तिवशान्निराशा**

**वेगादगाज्जनकजां द्रुतमत्तुकामा ।।**[9]

काव्यस्यास्य सप्तमसर्गे यदा श्रीरामचन्द्रस्य राज्याभिषेकार्थमुद्घोषणा जाता, तदा मन्थरायाः मन्त्रणया कैकेयी अभिमानं कृत्वा दशरथस्य खेदाय भूशयनमकरोत्। तदा दशरथः प्रियतमायाः कैकेय्याः मानभञ्जनार्थं यानि वचनानि उक्तवान्[10] तत्र शृङ्गाररसस्य आस्वादः सहृदयैः कर्तुं शक्यते । यथा –

**अहह नवनीतमृदुमृदुलशयनोचितम् ।**

**वपुरमितधूलिचितममलमुखं नोचितम् ।।**

**भूतले किमिह शयनं प्रिये ! वद सपदि चिन्तितम् ।।1।।**

**चपलमयि ! चण्डि ! मृदुवचनमतिशीतम् ।**

**रचय चिरममृतमपि यातु जगतीतलम् ।। 2 ।।**

**नयनविशिखेन हर मदनशरमन्ततः ।**

**हसितसुधयाऽपि कुरु लेपमसमन्ततः ।। 3 ।।**

**भवदतुलपदतलवहनगरुपर्वतः ।**

**हसदिवमिन्दुमुखि ! भूमिरपि सर्वतः ।। 4 ।।**

**अधिवसतु वेश्मकमलाद्य कतमस्य ते ।**

**त्यजतु वचसाऽपि वद कस्य विमतस्य ते ।। 5 ।।**

इत्यलं पर्यालोचितेन ।

-- टिप्पणी --

1. सा.द. - 3/183-186
2. गी.सी.व. - 4/1/1
3. सा.द. - 3/58
4. ल.टी. - पृ.112
5. गी.सी.व. - 5/2
6. गी.सी.व. - 5/द्वितीयप्रबन्धः
7. गी.सी.व. - 10/1
8. तत्रैव - 10/1/1
9. गी.सी.व. - 10/4
10. तत्रैव - 8/ प्रथमप्रबन्धः